In Public domain. Digitization Muthulakshmi Research Academy

83 (21) 83

3711

श्रुतिसूक्तिमाला

कल्पान्ते शमितत्रिविक्रममहाकङ्कालबद्धस्फुर-
छेषस्यूतनृसिंहपाणिनखरप्रोतादिकोलामिषः ।
विश्वैकार्णवताविहारमुदितौ यौ मत्स्यकूर्मावुभौ
कर्षन् धीवरतांगतोऽस्यतु सतां मोहं महाभैरवः ।।

यस्मै नमो भवति यस्य गुणाः समग्रा
नारायणोपनिषदा यदुपासनोक्ता ।
यो नः प्रचोदयति बुद्धिमधिक्रतौ यः
तं त्वामनन्यगतिरीश्वर संश्रयामि ।। १ ।।

वेदेषु वा तदनुयायिषु वा विचार्य
तन्त्रेषु वाक्यमखिलं प्रतिपादकं ते ।
तात्पर्यसंग्रहमहं विदधे महेश
मह्यं प्रसीद नय मामृजुना पथा त्वम् ।। २ ।।

मन्त्रार्थवादविधिभिर्बहुधा विभक्तो
यः शब्दराशिरनपेक्षितया प्रमाणम् ।

T. - पेक्षतया.

In Public domain. Digitization Muthulakshmi Research Academy

सोयं विमत्सरविमृष्टपदार्थतत्वो
वेदःप्रकाशयति केवलमीश्वर त्वाम् ।। ३ ।।

शब्दो यमीश्वर इति श्रुतिगोचरः सन्
आनीलकण्ठमवतंसितचन्द्रलेखम् ।
त्वामेव बोधयति नाथ निजार्थपोषात्
अन्यं पुनः प्रकरणादिनिपीडनेन ।। ४ ।।

शब्दस्तवायमभिधानमनन्यशब्दो
नैघण्टुकाः शिवपदादिवदेनमाहुः ।
यस्तु स्वभावकृतमेव तु पूज्यभावं
ब्रूते महेश्वर महान् परमश्च शब्दः ।। ५ ।।

यस्योपसर्जनमसौ परमो महान् वा
शब्दस्तदर्थमभिधातुमलं प्रकृष्टम् ।
शब्देन पूज्यवचनेन समस्यमानः
पूजां ब्रवीति यदि शब्दविदः प्रमाणम् ।। ६ ।।

नानीश्वरं भवितुमर्हति विश्वमेतत्
ब्रह्मीश्वरश्च नितरामयथाप्रमाणम् ।
तल्लोकलोकविदितेश्वरवर्जनेन

In Public domain. Digitization Muthulakshmi Research Academy

कोऽयं भ्रमः कतिचिदीश्वरमन्यमाहुः ।। ७ ।।

विश्वं निरीश्वरमिदञ्जगदाह साङ्ख्यो
योगश्च सेश्वरमुभावनुवादिनोऽन्ये ।
नत्वेव -T नत्वेन सम्भवति सेश्वरतां ब्रुवाणः
पद्मासनादिभिरनीश्वरशब्दवाच्यैः ।। ८ ।।

अनपायिन° -T ऐश्वर्यमग्र्यमनुपाधिनिबन्धनं ते
यद्भूतनाथ नमसामपि पात्रमेकम् । °आसि -T
तत् प्रायशः श्रुतिषु दुर्लभमेव वाक्यम्
मुक्त्वा -T उक्त्वा नमो भवति यत्र भवत्प्रसङ्गः ।। ९ ।। तव -T

देव त्वदेकविषयाणि नमांसि पुंसां
यस्मै नमःश्रुतिबलादवधारयामः ।
देवान्तरेषु विहितान्यपि तान्यमूनि
स्रोतांसि सागर इव त्वयि सन्तप्रन्त ।। १० ।। संप्रतन्ति -T

यस्मै नमःश्रुतिरनूद्य नमस्विनं त्वां -
मे/एका नियोजनमुवाच पशोः कपर्दिन् ।
अन्या च दिव्यशिशुमारशिरो भवन्तं शिरोऽधो- T
शक्यं तदित्थमुभयेन नमो विधातुम् ।। ११ ।।

In Public domain. Digitization Muthulakshmi Research Academy

श्रुत्यैर्द्वयोरपि नमस्विनमुच्यमानं
त्वामेव तं तमनुसन्दधतः प्रदेशम् ।
शंसन्ति मन्दमतयोऽपि किमापतन्तं
मध्यन्दिने हि सवितारमपह्नवीरन् ।। १२ ।।

कर्मैव शूलधर शूलगवं त्वदीयं
मन्त्रा भवन्तमखिलाः प्रदिपादयन्ति ।
त्वामन्तरेण नमसा कृतलक्षणाय
कस्मै पशुं नियुनजानि नियोजय त्वम् ।। १३ ।।

अङ्गान्तरेषु विबुधान्तरसंस्तुतेषु
यः शिशुमारशिरसः परिशिष्यसे त्वम् ।
तस्मै नमो भवितुमीश्वर सांप्रतं ते
देवान्तराय न कथंचिदनीश्वराय ।। १४ ।।

या वज्रिणी भवति शंकर शङ्किनी या
मुद्रा च या कमलिनी भरतोपदिष्टा ।
ताभिर्भवन्त्यभिनया विबुधान्तराणां
मौलिस्पृशा करपुटाञ्जलिमुद्रया ते ।। १५ ।।

In Public domain. Digitization Muthulakshmi Research Academy

दत्तं नमः किमुपशुश्रुम देवताभ्यः
त्वामन्तरेण नमसामवसानभूमिम् ।
तास्तद्गृहीतुमनलं न हि कश्चिदीष्टे
चोरोपनीतमिव धारयितुं किरीटम् ।। १६ ।।

तस्मै नमो भवतु यत्र निषीदसीति
सर्वे नमस्यमनया तु दिशा महेश ।
अप्योषधीः प्रति नमो वयमामनामो
देहीव देहमधितिष्ठसि येन सर्वम् ।। १७ ।।

सर्वं त्वयाजगदधिष्ठितमेव मत्वा
श्वानश्श्रुतौ नमसिताः पतयश्च तेषाम् ।
लोके पुनस्तव महेश्वर भक्तियोगा-
दारोपिता अपि वयं बहुमानपात्रम् ।। १८ ।।

द्वेधा नमो विमृशतः प्रतिभाति लोके
वेदेषु वा विषमलोचन नान्यरूपम् ।
यत्तन्नमस्त्वयि तदीश्वरताप्रयुक्तं
त्वत्सन्निकर्षविहितं यदनीश्वरेषु ।। १९ ।।

त्वत्सन्निकर्षकृत एव नमःप्रयोगः

In Public domain. Digitization Muthulakshmi Research Academy

प्रायो वसीयसि यवीयसि दृश्यमानः ।
श्रैष्ठ्यप्रयुक्त इति कल्पयितुं न शक्यम्
अश्रेयसामपि नमांसि निदर्शितानि ।। २० ।।

श्रैष्ठ्यप्रयुक्तमपि नाम नमस्त्वदीयं
श्रेष्ठोऽसि यः क्रतुभुजां पतिरघ्नियानाम्।
श्रेष्ठः श्रुतोऽसि भगवन्नविशेषतस्त्वं
मन्त्रेषु कृच्छ्रपठितेषु च सामगानाम् ।। २१ ।।

देवान्तरैःसह नमस्स्तुतिहुतयस्ते
तोषाय नालमलमेव विपर्ययाय ।
पुत्रार्थिनश्चरुविधौ सह चन्द्रमौले
सोमेन हूतमनुशुश्रुम रुद्रमग्निम् ।। २२ ।।

अग्निं प्रकृत्य खलु रुद्रपदं प्रयुङ्क्ते
तद्ब्राह्मणं भवति यत्र तयोः सहूतिः ।
आह्वानमत्र भवतः पृथगेव दृष्टं
यत्त्वैतरग्निमिति सूक्तविदः पठन्ति ।। २३ ।।

अग्र्यादिभिस्तव महेश्वर हूतिशङ्का
मा भूदिति प्रकृतमप्यनुषङ्गयोग्यम् ।

In Public domain. Digitization Muthulakshmi Research Academy

मन्त्रः क्रियापदमपास्य पदान्तरेण
त्वामाह्वयन्नुतपदेन भिनत्ति रीतिम् ।। २४ ।।

न्यासीकृतं वसु बलादमरैरवाप्तु-
मन्वागतो रुदितवानिति रुद्रमग्निम् ।
रुद्रांस्त्वदुद्भवतया मरुतो गणान् वा
रुद्रावणेन च भवन्तमवैमि रुद्रम् ।। २५ ।।

यज्ञेऽपि रुद्रपदमारुणकेतुकोक्तं
तच्छब्दमीश्वर तदीयमपि स्मरन्ति ।
यत्तत्प्रदेशगतयज्ञपदावकाशे
यज्ञस्य शब्दमनुशुश्रुम सामगेभ्यः।। २६ ।।

सन्ताप्य रोदयितरि प्रसभं जनाना-
माहुर्ज्वरेऽपि विषमेक्षण रुद्रशब्दम् ।
रौद्रं च तत्प्रकृतिकं प्रतिरूपकं वा
शब्दान्तरं भवति वायसशब्दकल्पम् ।। २७ ।।

सन्त्येव तद्धितपदप्रतिरूपकाणि
भूरीणि भागवतसात्त्वतसन्निभानि ।
स्यात्तादृगेव भगवानिति शब्दरूपं

In Public domain. Digitization Muthulakshmi Research Academy

षाड्गुण्यहेतुकमपि त्वदुपैति नान्यम् ।। २८ ।।

ऐश्वर्यमग्र्यमनुपाधिमती च लक्ष्मी-
ज्ञानं च वीर्ययशसी च विरागता च ।
एते गुणाः षडपि ते भगसंज्ञयोक्ताः
सन्तीत्यनेन भगवन् भगवानसि त्वम् ।। २९ ।।

ऐश्वर्यमीश्वरपदश्रुतिरुग्रशब्दो
वीर्यं यशःशिवपदं च तवाभिधत्ते ।
सर्वज्ञकामरिपुशब्दसमर्थितौ च
सार्वज्ञ्यरागविरहौ भवतः पुरारे ।। ३० ।।

अर्थःश्रिया शिव न कोऽपि विरज्यतस्ते
श्रेष्ठस्तया त्वमसि दाशतयीभिरुक्तः ।
लब्धश्रियं जनिम चारु विचित्ररूप-
मभ्यर्चितं तव मरुद्भिरुदाहरन्ति ।। ३१ ।।

सत्यं क्षमा धृतिरधिष्ठितिरात्मबोध-
सृष्टिर्विरागतपसी मतिरीश्वरत्वम् ।
न त्वद्वियन्ति न कदाचिदपैति धर्मः
किं तन्न यद्भवति ते गुणसंमतेषु ।। ३२ ।।

In Public domain. Digitization Muthulakshmi Research Academy

नैवेश्वरान्न यशसा महतो न वीरा-
न्न श्रीमतः क्षितिपतीनपि सार्वभौमान् ।
अन्यादृशानपि महेश्वर वीतरागान्
प्रज्ञावतो भगवतः प्रवदन्ति वृद्धाः ।। ३३ ।।

आथर्वणा मदनशासन निब्रुवाणा
नामानि नाम भगवानिति ते निराहुः ।
अत्याश्रमोपनिषदाह भगेश्वर त्वा-
न्नैघण्टुकाश्च भगवन्तमुशन्ति पूज्यम् ।। ३४ ।।

पूजा तमुष्टुहिवता विहिता महेश
मन्त्रेण वाङ्मनसकायनिबन्धना ते ।
सर्वाभिरप्युपनिषद्भिरुपासनोक्ता
नारायणोपनिषदं परिभावयामः ।। ३५ ।।

वाक्यं यदाह दहरान्तरुपासनं ते
यद्वा समर्पयति रूपविशेषमस्मै ।
अन्तर्गतैरपि तदोपयिकाभिधेयै-
र्भाव्यं वचोभिरिति वाक्यविदां प्रवादः ।। ३६।।

In Public domain. Digitization Muthulakshmi Research Academy

371010

नारायणस्य यदुपास्यतयाऽभिधानं
यद्वा फलं तदिह नोपलभे कथंचित् ।
उत्पत्तिशिष्टभवदन्वयमन्यगामि
शक्यं महेश्वर न कर्तुमुपासनं ते ।। ३७ ।।

नासावुपासनमुपास्यकथैव दूरे
तस्मादुपासकतया परिशेषसिद्धिः ।
अन्तर्व्यवस्थितगिरा परमात्मनस्ते
शब्दादृतेऽपि विहितं तदुपासकत्वम् ।। ३८ ।।

यस्य स्थितोऽसि हृदये परमस्त्वमात्मा
युक्तं न तस्य परमात्मतयाभिधानम् ।
स्वेन स्वयं मनसि वह्निशिखान्तराले
तिष्ठन्नुपास्य इति हास्यपदं न कस्य ।। ३९ ।।

नारायणस्य हृदयं सुषिरं महाग्नि-
रग्नेः शिखा च परमात्मपदं यदुक्तम् ।
सर्वोप्युपासनविधैरयमर्थवादः
श्रद्धाविशिष्टपुरुषाचरणाद्विधेये ।। ४० ।।

नारायणप्रकरणे हृदयं यदुक्तं

In Public domain. Digitization Muthulakshmi Research Academy

तस्यैव तद्भवितुमर्हति नापरेषाम् ।

दृष्टं यतिप्रकरणे यैतभिर्गृहीतं

पूर्वानुवाकविहितं यदुपासनं ते ।। ४१ ।।

ब्रह्मोच्यते परमसौ परमं च तत्त्वं

ज्योतिःपरं च पद्मनाभः ।

त्वद्भावनैकरसिकस्त्वदनन्यभावान्

मन्त्री यथा गरुडभावनया गरुत्मान् ।। ४२ ।।

गीतासु योगजविभूतिविभावनाय

नारायणः शिवपदं प्रतिवाचमूचे ।

योगं निशामय महेश्वरगोचरं मे

दिव्यं ददामि तव चक्षुरिति प्रसन्नः ।। ४३ ।।

त्वामन्तरेण न कथंचिदुपासनीय-

मन्यं ब्रवीति सशिवस्तुतिरन्तकारे ।

यद्ब्रह्मशब्दसमभिव्यवहारयोगात्

संहारकारिणि हरे शिवशब्दमाहुः ।। ४४ ।।

विश्वाधिकस्त्वमसि विश्वमयं मुरारि-

र्यज्ञेश्वरस्त्वमसि यज्ञममुं गृणन्ति ।

In Public domain. Digitization Muthulakshmi Research Academy

आद्या जगत्प्रकृतिरेषभवान्निमित्त- # विमिन्तं-T
मातः कथं नु भगवन् युवयोरभेदः ।। ४५ ।।

विश्वात्मनस्तुतिषु विश्वपतित्ववादः
सङ्गच्छते स्तुतितयैव रथाङ्गपाणेः ।
विश्वस्य पत्युरथ विश्वतयाभिधानं
नालं गुणाय गुणगृह्यनिकर्षहेतुः ।। ४६।।

विश्वं महेश्वर भवानधितिष्ठतीति
विश्वात्मतामुपचरन्ति यदागमास्ते ।
तत्पण्डिता विदितवेदरहस्यशीलाः
मूढ°-T जानन्ति मन्दमतयस्तु तदेव सत्यम् ।। ४७ ।।

तुभ्यं नमो विदधदीश्वर तं तमर्थ-
मातिष्ठते सकलकर्मसु विश्वदर्शी । सर्व°-T
°वाक्°-T सर्वानुवादमिदमुक्तसमर्थनाय
कात्यायनो मुनिरुदाहरति स्म गृह्ये ।। ४८ ।।

स्थानं यदान्तरमुपास्तिरुपासको वा
तथा-Tadd या सा परापरतया विविधा विभूतिः । परतया-T
यद्वा पुनर्विषमनेत्रमुपासितव्यं

In Public domain. Digitization Muthulakshmi Research Academy

371313

नारायणोपनिषदाह तदत्र सर्वम् ।। ४९ ।।

यज्ञात्मना स्वयमसावृषिणोपदिष्टा
नारायणेन भवतः प्रतिपादयित्री ।
सूक्तं यथा पुरुषदैवतमन्तकारे
नारायणार्षमिति तद्व्यपदिष्टमाहुः ।। ५० ।।

एषा महोपनिषदाह हिरण्यगर्भं
जातं त्वदेव भगवन् प्रथमं सुराणां ।
नारायणाभिजनमेनमथापि मन्दाः
शंसन्ति तत्रभवतः कतिचित् प्रसूतिम् ।। ५१ ।।

मध्ये ललाटमरविन्दभुवः क्षणेन
दृष्टो भवानिति क एष निकर्षवादः ।
योगाभिरूढमनसः शिवमादृशोऽपि
स्थनेषु पञ्चसु न कस्य तवोपलम्भः ।। ५२ ।।

ब्रह्माणि पञ्चतनवः शिवमन्त्ररूपा
जीवातवः पशुपते शिवसंहितानाम् ।
रुद्रेषु पुण्यमिव पञ्चकमक्षराणा-
मस्यां महोपनिषदीति महत्ववादः ।। ५३ ।।

In Public domain. Digitization Muthulakshmi Research Academy

विद्येश्वरस्त्वमसि भूतपतिस्त्वमेकः
स्रष्टुर्भवानधिपतिः सृजति प्रपञ्चम् ।
यद्ब्राह्मणान् प्रति तव श्रुतमाधिपत्यं
तद्ब्रह्मणो मम सदिशिव जन्मलाभः ।। ५४ ।।

विद्येश्वरत्वपुनरुक्ततया न वाच्यं
वेदाधिपत्यमयमेव महेश देवः ।
विद्या भवन्ति शतशः प्रविभज्यमानाः
स्रोतांसि किन्न सरितेव पृथक्कृतानि ।। ५५ ।।

आदित्यमृग्यजुषसामनिधानकोशे
बिम्बे निविष्टमधितिष्ठति पुरुषो यः ।
एषा तमेष इति साभिनया भवन्तं
भूताधिपत्यवचनेन शशंस नाम्ना ।। ५६।।

उक्तो हिरण्यपतिरेष हिरण्यबाहु-
रुक्तोऽम्बिकापतिरुमापतिरेष उक्तः ।
आहुर्भवन्तमधिदैवतमुष्णरश्मे-
रतस्तदर्चनविधौ भगवन्नभिज्ञाः ।। ५७ ।।

In Public domain. Digitization Muthulakshmi Research Academy

371515

यो मण्डलं तपति यश्च तदन्तरात्मा
या चानयोर्भवति भूतपते विभूतिः ।
जानान एतदपि यत्फलमेते च
सर्वं यथावदिह तत्कथितं क्रमेण ।। ५८ ।

मा नाम भूदखिलमन्यदिमं प्रदेश-
मध्यापितास्तदिति मन्त्रविदो भवन्ति ।
वाच्यः किमस्य सविता सवितुर्वरेण्यः
किं वा भवानिति वितर्कपदं न तेषाम् ।। ५९ ।।

भास्वन्तमेष विषयीकुरुते न मन्त्रः
शक्नोति वक्तुमधिदैवतमीश्वरं त्वाम् ।
यस्मादयं त्वयि निरोहति भर्गशब्दः
प्रज्ञाप्रचोदकतया तदधीयसे त्वाम् ।। ६० ।।

सान्तोऽयमन्तकरिपो यदि भर्गशब्दो
यत्तत्पदद्वयमनन्वयि लिङ्गभेदात् ।
अन्वेषयेदुभयमन्यमभिन्नलिङ्ग-
मश्रूयमाणमसमञ्जस एष पक्षः ।। ६१ ।।

शब्दस्मृतिर्ह्यसुनि वा घञिवा पदान्ते

In Public domain. Digitization Muthulakshmi Research Academy

371616

युक्तं वदत्युभयथा स्वरमाद्युदात्तम् ।
व्यत्यस्तकारकमवैमि पदं घञन्तं
मैत्रायणश्रुतिपराहतसान्तभावम् ।। ६२ ।।

मैत्रायणश्रुतिरसौ तदिति प्रकृत्य
भर्गं भवन्तमभिधाय विचिन्तनीयम् ।
रुद्रस्य भर्गपदगोचरतां ब्रुवाणा
सान्तं प्रतिक्षिपति भर्गपदं पुरारे ।। ६३ ।।

सान्तं पदं तदपि नाव ददाति वक्तुं
यद्ब्राह्मणं तलवकारिण आमनन्ति ।
प्रश्नोत्तरक्रमनिरूपितपूर्वपादं
पादं द्वितीयमपि भर्गमयं ब्रवीति ।। ६४ ।।

भर्गः प्रचोदयति यो धियमस्मदीयां
तं धीमहीति घटना विनिमाय लिङ्गम् ।
वाच्यस्य भर्ग भवतः स्वपदाभिधानं
भर्गाख्यमित्यपि च साम्ब वचोनुरोधः ।। ६५ ।।

त्वामेव मन्त्रोपनिषद्ब्रवीति
तदित्यृचोऽस्याः प्रतिपाद्यमर्थम् ।

In Public domain. Digitization Muthulakshmi Research Academy

371717

तदक्षरं तत्सवितुर्वरेण्यं
प्रज्ञा च तस्मात् प्रसृता पुराणी ।। ६६ ।।

भर्गोऽपि सन् सवितृशब्दसमन्वयेन
सावित्रतामपि विगाहत एव मन्त्रः ।
तत्तत्पदान्वयवशेन महेश मन्त्रां-
स्तद्दैवतानपि हि मन्त्रविदः पठन्ति ।। ६७ ।।

अप्यर्कदैवतवतीमृचमामनामः
शब्देन विश्व इति शङ्कर वैश्वदेवीम् ।
पित्र्यां च मर्त इति पुण्यपदेन पौष्णी-
मेतादृशानि कति नाम निदर्शनानि ।। ६८ ।।

एषा गतिः श्रुतिगिरामिति निर्णयेन
तत्तद्गृहार्चनविधौ मुनयः स्मरन्ति ।
मन्त्रेण शङ्कर शनेः शमुपक्रमेण
बुध्यस्वशब्दसहितेन बुधस्य पूजाम् ।। ६९ ।।

आम्नायमृग्यजुषसामविधं विचिन्त्य
सारं समुद्धृतवता परमेष्ठिनापि ।
मन्त्रस्त्रिपादयमदृष्टविधान्तरेण

In Public domain. Digitization Muthulakshmi Research Academy

371818

दृष्टश्चराचरगुरो मनुना यथोक्तम् ।। ७० ।।

गृह्णातु काममनलः सकलं हविस्ते
राज्ञो बलिं हरतु भागदुघः प्रजाभ्यः ।
पार्थेन शङ्कर निवेदितमम्बुजाक्षे
नैशं हविः स्फुटमदृश्यत पादयोस्ते ।। ७१ ।।

सोमं त्वदर्थमनुशुश्रुम सूयमान-
मालम्भनं पशुपते नियतं पशूनाम् ।
गव्यं च ते गवि सदेव तदध्वरेषु
चण्डेश्वरेण सह नाकसदां विवादः ।। ७२ ।।

उत्पत्तितः शिव गृहीतसमन्वयास्ते
सोमः पशुर्गवि च सन्ति हवींषि तानि ।
देवाः पशौ हविषि भागमनुज्ञाय ते
गृह्णन्ति तद्वदितरेष्वपि कल्पनीयम् ।। ७३ ।।

कर्मैकमेव न परं पशुबन्धनं ते
कर्तव्यमाहुरुपलभ्य तवाभ्यनुज्ञाम् ।
सर्वेषु कर्मसु भवत्प्रसवेन पुंसा-
मारम्भणं प्रपदमन्त्रविदो गृणन्ति ।। ७४ ।।

In Public domain. Digitization Muthulakshmi Research Academy

371919

संकल्पित :-T

सङ् कल्पतः प्रभृति यज्ञतनुं विभज्य
देवान् प्रजापतिमुखान् प्रति दर्शयन्तः ।
सोमाहुतिं हुतवहार्चिषि हूयमाना-
मध्वर्यवस्तव गृणन्ति गिरीश भागम् ।। ७५ ।।

सर्वं धनं धनपतेरुपभुक्तशिष्टं
यद्देवतातिथिसमाश्रितभृत्यवर्गैः ।
यज्ञेश यज्ञपरिशिष्टमपि त्वदीय-
मन्धिग्रहव्यतिकरे भवता यथोक्तम् ।। ७६ ।।

ग्रहीष्यति करे -T

गव्येन सोम हविषा चरुभिश्च पक्वैः
साध्यान् त्रिसप्त मुनयो विभजन्ति यज्ञान् ।
सर्वेषु तेष्वपि भवानविशेषतस्त्वां
राजानमध्वरविधौ वयमामनामः ।।७७ ।।

थानू -T
सप्तसप्त -T

अग्निं प्रकाशयतु शंकर रुद्रवन्तं
मन्त्रस्त्वमग्न इति वा तदनन्तरो वा ।
राजन्वती क्षितिरितीव विशेषणस्य
नालं प्रतीपमपनेतुमिमौ पिरकर्षम् ।। ७८ ।।

In Public domain. Digitization Muthulakshmi Research Academy

या रोहिणी भवति देव तदा त्वदीया
तस्यां त्वदेकविषयौ विषमाक्ष दृष्टौ ।
मन्त्राविमौ तदिह यज्ञपतित्वमीश
स्पष्टं त्वदेकविषयं प्रतियान्ति धीराः ।। ७९ ।।

पित्रा कुमारमिव भृत्यमिवेश्वरेण
शिष्यं गिरीश गुरुणेव गुणाधिकेन ।
अग्निं त्वया कृतविशेषणमूचिवांसौ
मन्त्राविमौ गमयतः परमं प्रकर्षम् ।। ८० ।।

ऋक्संहिता वदति मेधपतिं भवन्तं
राजानमध्वरविधेरयमाह मन्त्रः ।
त्वत्सूक्तमन्त्रगणमण्डनमौलिरत्नं
रूपेण च त्वदभिधानगृहीतशक्तिः ।। ८१ ।।

त्वत्कं पुरा मरणतस्तनयिलुकल्पा-
दाकारणं परमकारुणिक ब्रुवाणः ।
मन्त्रोऽयमाव इति यावदुपक्रमाय
मूलं महेश विदितं शिवधर्मसूकितैः ।। ८२ ।।

भीमोऽसि शंकर मृगो नु निदर्शनं ते

In Public domain. Digitization Muthulakshmi Research Academy

372121

तेजोभिरुज्ज्वलितसूर्यसहस्रकल्पैः ।
अक्रोधनस्मितमुखोऽपि निजानुभावा-
दापाततस्तनुभृतां नृपतिर्भयाम ।। ८३ ।।

भयाय - T

अभ्युद्यतं गिरिश वज्रमधीमहे त्वां
त्वद्विभ्यतः पवनभानुकृशानुशक्राः ।
मृत्युश्च तत्तदधिकारभृतस्तथान्ये
ब्रह्मत्वलक्षणमयं भयहेतुभावः ।। ८४ ।।

घोरा शिवा च भगवन्नुभयी तनुस्ते
घोरा भिषज्जति भवार्तमुपास्यमाना ।
अन्या भिषग्जनकृतां रुजमीक्षमाणा
दृष्ट्या ददाति शिवतामशिवात्मनोऽपि ।। ८५ ।।

घोरान्नमो विदधतः शमयन्ति रुद्रै-
रार्ता हि घोरमुपयान्ति चिकित्सितारम् ।
प्रीणन्ति शंकर शिवां चमकानुवाकै-
र्होमस्य यत्तव भवन्त्युभयेऽपि मन्त्राः ।। ८६ ।।

विष्णुप्रजापतिपुरन्दरपूर्वकेषु
वाजादितुल्यमितरेष्वपि दैवतेषु ।

In Public domain. Digitization Muthulakshmi Research Academy

372222

आशंसितेषु चमकाः परिशिष्यमाणं
दातारमीश्वर भवन्तमशब्दमाहुः ।। ८७ ।।

युक्तं न मानयितुमीश्वर सन्निधौ ते
देवान्तराणि महतामिव मर्त्यमात्रम्।
अन्तर्धिमध्वरविधौ तदपेक्षमाणाः
त्वत्कर्मसीम्नि परिषेचनमाचरन्ति ।। ८८ ।।

आत्मान्तराणि पशवः परतन्त्रभावात्
स्वातन्त्र्यतः पशुपते पतिरीश्वर त्वम् ।
आत्मानमौपनिषदाः प्रवदन्त्यनीश-
मीशं भवन्तमुभयोरुभयं स्वभावः ।। ८९ ।।

संप्राप्त एव सति शंकर पाशुपत्ये
कस्मै वरेण्य वरणं कृपणोचितं ते ।
विध्यर्थमध्ययनचोदनया गृहीता
जल्पन्ति यत्किमपि वन्दिवदर्थवादाः ।। ९०।।

नानापदानवचनादपि वारणीय-
स्त्वत्पाशुपत्यवरणप्रतिलम्भवादः ।
लब्धुं वरीतुमथवा कथमेक एव

In Public domain. Digitization Muthulakshmi Research Academy

372323

वारान् बहूनपि महेश्वर शक्यतेऽर्थः ।। ९१ ।।

अङ्गैः स्थिरेभिरिति रूपमनश्वरं ते
भूरीणि तानि च भुजङ्गममालभारिन् ।
मन्त्रेण चान्तरिति युष्मदुपासकाना-
मार्ग्वैदिका यदशनं तदमोघमाहुः ।। ९२ ।।

भावोपपन्नमनसां त्वदुपासकानां
पुंसाममोघमशनं भगवन् ब्रुवाणः ।
मन्त्रोऽयमन्तरिति नः प्रतिभाति मूलं
प्राग्भुक्तमर्चनविधेरनुवासरं ते ।। ९३ ।।

नाथ त्वया पितृमतो मरुतस्तुवाना-
स्त्वामामनन्ति भरतं नटनाभियोगात् ।
वैशेषिके सति खलु व्यपदेशहेतौ
साधारणेन भरणेन न कश्चिदर्थः ।। ९४ ।।

हिंसाप्रतीतिरभिमानपदैकदेशा-
च्छब्दादभेरिति भयेन समुद्वपन्ति ।
कामान्तकत्रिपुरदक्षमखादिभङ्ग-
विख्यातविक्रमतया कथितोऽसि वीरः ।। ९५ ।।

In Public domain. Digitization Muthulakshmi Research Academy

372424

हिंसाभिधातृपदसन्निधिना ज्वरार्थं
रुद्रेति नाम परिशङ्क्य परावपन्तः ।
मन्त्रे यथा न इति मङ्गलवाचि दृष्टं
देवेश रुद्रिय पदं पुनरावपन्ति ।। ९६ ।।

शाखासु शंकर सहस्रतयीषु साम्ना-
माम्नायते तव न केवलमानुभावः ।
सर्वात्मनामधिपतेरविशेषतस्ते
देवव्रतादिषु गणाः कथितानुभावाः ।। ९७ ।।

स्कन्दं विनायकमुभावपि ते कुमारौ
सर्वैर्गुणैः पितरमेव निदर्शयन्तौ ।
सामोपगायमुपगायमृचां गणेषु
संप्रीणयन्ति शिव सामविधौ बतोक्तम् ।। ९८ ।।

ब्रह्मादिकं सकलमन्यदपोह्य पुंसां
ध्यातव्यमेकमभिधाय शिवंकरं त्वाम् ।
वक्तव्यमन्यदनपेक्ष्य विमोक्षहेतु-
माथर्वणः परिसमाप्तिमुवाच वेदः ।। ९९ ।।

In Public domain. Digitization Muthulakshmi Research Academy

यामामनन्ति तव शंकर धर्मदारा-
नध्वर्यवः सहजसिद्धतया स्वसारम् ।
आथर्वणा यदुपसृष्टतया भवन्तं
ध्यातव्यमाहुरपहाय पितामहादीन् ।। १०० ।।

एकः श्रुतोऽसि परमेश्वर सद्वितीयं
मन्त्रा यथा व्यपदिशन्ति पुनः पुनस्त्वाम् ।
तस्याः प्रभावमतिवाङ्मनसं शिवायाः
कार्त्स्न्येन वक्तुमनलं कमलासनोऽपि ।। १०१ ।।

एकं मुखं त्रितयमीश्वर लोचनानां च
चत्वारि दोंषि विशदं वपुरद्भुतं ते ।
नित्यं तदव भजतामुपकारहेतो-
र्नाना भवन्ति तनवस्तव दिव्यरूपाः ।। १०२ ।।

कैरातमीश्वर पिनाकधरं वपुस्ते
कृत्तिं वसानमुमया सह धर्मदारैः ।
आराधयन्ति खलु पर्वणि सामेकधैः
पुण्यैस्त्रियंबक हविर्भिरनन्यभावाः ।। १०३ ।।

मीढ्वासमन्तविनिवेशितमीढुषीक-

In Public domain. Digitization Muthulakshmi Research Academy

मन्तर्जयन्तमजरामरविग्रहं त्वाम् ।
त्वद्द्वारपं दयितया सह देवसेनं
क्षेत्रस्य नाथमपि नाथ यजन्ति धन्याः ।। १०४ ।।

गणैः-T

पत्या समं सह गणाः सह वा सुताभ्यां
सार्द्धं तथा परिषदा विषमेक्षण त्वाम् ।
अध्यष्टमीतिथिनिशामुखमर्चयन्तः
पापं तरन्त्यपि जयन्ति महेश मृत्युम् ।। १०५ ।।

विजयन्ति-T

मन्त्रा भवन्ति विरला विबुधान्तराणां
सद्भाव एव शिव दर्शितशक्तयस्ते ।
त्वन्नामरूपगुणवर्णनलब्धवर्णा
मन्त्रा न शक्यमवगन्तुमियत्तया ते ।। १०६ ।।

रुद्रानुवाकपठितानि परस्सहस्रं
नामानि दिव्यमपि रूपमनेकशस्ते ।
शक्यं गुणा घमयितुं गणना यदि स्याद्
भौमेषु पांसुषु विना तव देव मायाम् ।। १०७ ।।

गण°

न गुणा-T

वेदः स्वयं भवतु वा तव वा प्रणीतिः
सर्वप्रमाणमविहाय गृणाति लोकः ।

सर्वः-T

In Public domain. Digitization Muthulakshmi Research Academy

372727

तत्तत्प्रवक्तृगुणदर्शिततारतम्य-
मन्यत्प्रमाणमविरोधिनि वेदवाक्ये ।। १०८ ।।

वेदाः प्रमाणमिति संगिरमाण एव
दिव्यं तवागममवैति जनः प्रमाणम् ।
त्वद्ध्यानवाक्यविषयौपयिकैः पदार्थै-
रामूर्द्धमाकलितविग्रहमा च मूलात् ।। १०९ ।।

ध्यानं यथा भवति तद्विषयो यथा त्वं
यादृग्गुणश्च भगवन्नधिकारिवर्गः ।
सर्वाणि तानि भवदागमसंहिताभिः
कल्पैरिवाध्वरविधेरुपपादितानि ।। ११० ।।

अध्वानमध्वपतिमध्वनि तारतम्यं
श्रेष्ठाध्वपारगमनं च फलं ब्रवीति ।
मन्त्रोऽध्वनामिति महेश्वर गृह्यकारः
पित्रा कुमारमुपनीय वदन् हि वाक्यम् ।। १११ ।। यदाह-T

कल्पाः प्रमाणमृषिभिर्यदि नः प्रणीताः
किं न प्रमाणमृषिणा महता महर्षे । महतां-T
शक्यं न वक्तुमपरिग्रहदूषितानि ऋषीणां-T

In Public domain. Digitization Muthulakshmi Research Academy

372828

तन्त्रान्तराणि भवता शिव कर्तृमन्ति ।। ११२ ।।

आचक्षते यमृषिमार्षविदस्तपोभि-
रेकैकमन्त्रदृशमीश्वर वेदराशेः ।
द्रष्टारमस्य निखिलेन निजानुभावा-
दन्यानृषीनति महर्षिमतो विदुस्त्वाम् ।। ११३ ।।

उक्तं प्रधानपुरुषेश्वरमेव सांख्यै-
राख्याय पाशपशुपत्यभिधानभेदात् ।
ज्ञेयं त्वदागमविदः शिव संगिरन्ता-
मेतावता किमिति नस्तदुपेक्षणीयम् ।। ११४ ।।

प्रत्यक्षवेदविहितं प्रथितं पुराणै-
र्बोधायनेन मुनिना बहुशः प्रणीतम् ।
सर्वार्थदर्शनपरैरपि गृह्यकारै-
र्यज्ञोपवीतमिति विस्मृतमर्चनं ते ।। ११५ ।।

वेदोपबृंहक पुराणवचःप्रपञ्चै-
राघोष्यते विषमनेत्र समर्चनं ते ।
तन्त्रैरलं तदुपबृंहकवेदमूलै-
र्वात्याहतं न हि मुखानिलसव्यपेक्षम् ।। ११६ ।।

In Public domain. Digitization Muthulakshmi Research Academy

372929

वेदार्थनिर्णयविधौ हि पुराणमङ्गं
निर्णीतवेदविषया स्मृतयो भवन्ति ।
आतश्श्रुतेरिव पुराणगिरः सकाशे
नालं प्रकाशयितुमात्मबलावलेपम् ।। ११७ ।।

मूलश्रुतेरनुपलम्भपराहताया
दूतीव या न भवति स्वरसात् प्रमाणम् ।
प्रत्यक्षवेदविहितं यजनं त्वदीयं
तस्याः स्मृतेरपि किमिच्छति दृष्टिपातम् ।। ११८ ।।

पौर्वाह्निकानुपदिशन्नियमान्न्यदेत-
दभ्यर्चनं मनुरवोचत देवतायाः ।
तत्किं पुनस्तव महत्यसि देवतात्वं
मृग्ये च काचशकलेन मणेरुपेक्षा ।। ११९ ।।

पत्या समं सह वृषेण वृषेन्द्रकेतो
युष्मद्वलीनुपदिशं स्त्रिदशावकाशे ।
अभ्यर्चनं भवनकल्पनपूर्वकं ते
बोधायनः कथितवानवयुत्य गृह्ये ।। १२० ।।

In Public domain. Digitization Muthulakshmi Research Academy

भावान्तराणि परिहाय महस्तु नित्यं
विज्ञानयोगविभवेषु महीयसे यत् ।
देवो महानभिहितोऽसि ततः कपर्दिन्
नाम त्वदीयमिदमाङ्गिरसा निराहुः ।। १२१ ।।

om- T.

द्वेधा तवार्चनविधिस्तरुणेन्दुमौले
कामाय कश्चिदपरो दुरितक्षयाय ।
अप्यग्निहोत्रमुभयं वयमामनामः
स्वर्गाय यद्भवति यद्दुरितं क्षाणोति ।। १२२ ।।

यद्ब्राह्मणस्त्वमसि नाकवतां निकाये
तुभ्यं निवेदितमभोज्यमिति स्मरन्ति ।
उच्छिष्टमीश्वर विशिष्टमपि द्विजानां
भूमौ निखेयमथवाम्भसि मज्जनीयम् ।। १२३ ।।

°सदां -T

°महाद्विजानां -T

त्वं ब्राह्मणस्त्वदुपधावनमेव कार्यं
तद्ब्राह्मणैस्त्वदितरे न भवन्त्युपास्याः ।
न ब्राह्मणानवरवर्णनिषेवणेन
संभावयेम यदि न प्रपदं प्रमाणम् ।। १२४ ।।

°वाणि°-T

#

नः-T

उत्कर्षतः परिहरन्त्यपकर्षतो वा

In Public domain. Digitization Muthulakshmi Research Academy

373131

का वासना भवति कस्य कृते न विद्मः ।
यद्दीक्षितस्य पतितस्य च तुल्यरूपं
प्रत्यादिशन्ति मुनयः कमनीयमन्नम् ।। १२५ ।।

चण्डालचण्डिलचितानलशौण्डिकानां
गोब्राह्मणज्वलनदीक्षितयोषितां च ।
स्पर्शः कया भवति वासनया निषिद्धः
स्पृष्टेषु वा शिव कया विहिता विशुद्धिः ।। १२६ ।।

वर्ज्यान्नमाहुरपि दीक्षितमग्निकल्पं
भोज्यान्नमेव कृतराजपरिक्रयं तम् ।
शङ्खास्थिपावनमपावनमस्थि नृणा-
मित्थं स्थिते वचनमत्र परायणं नः ।। १२७ ।।

अब्राह्मणैः क्षुदपघातकमस्तु भोज्यं
यद्देवतान्तरनिवेदितमुक्तमन्नम् ।
तद्ब्राह्मणैरपि किमीश्वर वैश्वदेवे
भार्यो बलिर्बलिमतामशितेन तेन ।। १२८ ।।

देवान्तरैररशितमुक्तमनङ्गशासि-
न्नन्ति चेदनशितन बलिं हरन्तः ।

In Public domain. Digitization Muthulakshmi Research Academy

373232

आश्यैकदेशविहितो बलिरन्यथास-
न्नालं फलाय विपरीतफलश्च तेषाम् ।। १२९ ।।

ब्रह्माणमीश्वर पुरा हतवानसीति
भिक्षाटनं विमृशतः प्रतिभानमात्रम् ।
यत्पञ्चमे शिरसि पुष्पसमं निकृत्ते
जीवन्तमेनममितायुषमाहुरार्याः ।। १३० ।।

आनाभिजानु वसितं वसनं न शाणं
पाणौ कपालशकलं न विलोकितं ते ।
नालम्बते शवशिरसस्तव केतुयष्टौ
भैक्षं न स्वभवनं सकलं तदास्ताम् ।। १३१ ।।

यत्कालभैरवकृतं पतनीयमेनः
किं तेन ते भवति भैक्षमथापि वृत्तिः ।
तन्मध्यपातिनि वधे विबुधान्तरस्य
निर्वेदमाचरसि किं नु भवानजस्रम् ।। १३२ ।।

यत्पाशुपत्यमवृणोदमरान्तरेभ्यो
भिक्षां भवनकृत यत्परमेश्वरोऽपि ।
चोद्यं तदेतदुभयं परिहर्तुकामो

In Public domain. Digitization Muthulakshmi Research Academy

373333

मन्ये बृहस्पतिरपि प्रतिपत्तिशून्यः ।। १३३ ।।

ब्रह्मासि विष्णुरसि सर्वमसीति यत्त्वा-
मास्तामुपासनविधिं कथयन्ति मूढाः ।
तद्देवतान्तरनिकर्षनिगूहनाय
मोहाय वा भवतु जल्पितमल्पबुद्धेः ।। १३४ ।।

अद्वैतमागमशिरोभिरुपासनाया-
मुक्तं तवेति परमार्थतया न वाच्यम् ।
भेदः स्फुटो गरुडमान्त्रिकयोरलीकं
तादात्म्यभावनमथापि विषं प्रमार्ष्टि ।। १३५ ।।

यद्ब्रह्मपञ्चमशिरोलवनापदानं
यद्ब्रह्मणा च हरिणा च विमार्गणं ते ।
यद्वा तयोर्जनयितारमधीमहे त्वां
तत्सर्वमीश्वर विमूढधियामसह्यम् ।। १३६ ।।

सोमे लतात्मनि महेश्वर गौणवृत्त्या
विष्णोरवादि जनकत्वमृचा कयापि । कयाचित् - ?
त्वय्येव तद्भवितुमर्हति मुख्यवृत्त्या
नेन्द्रे न पङ्कजभवे नितरां मुरारौ ।। १३७ ।।

?

In Public domain. Digitization Muthulakshmi Research Academy

373434

अन्योन्यतो यदि भवेदहमीश्वरः स्यां
त्वं चाहमीश्वर किमत्र नियामकं नः ।
को वा विपर्यसितुमर्हति वसितुशक्तिं
तत्तत्स्वभावनियतां भवदाज्ञयापि ।। १३८ ।।

एकं तवाप्यसुकरं तदुदाहरामो
जातेन भावियममरान्तरवत्वयापि ।
अभ्यर्थितोऽपि हि महेश महर्षिदारै-
रन्तर्हितस्त्वमसि गर्हितगर्भवासः ।। १३९ ।।

इच्छावतीर्णमुरशासनगर्भवासः
स्याच्चेदुदाहरणमेष विमर्शनीयः ।
गर्भे वसामि परिवेष्ट्य जरायुणाऽहं
मासान्बहूनिति महेश्वर कस्य कामः ।। १४० ।।

इच्छापि नूनमनुयाति पुरा कृतानि
कर्माणि शंकर शुभाशुभलक्षणानि ।
इच्छावतारवचनानि तु भारतादौ
नारायणस्य गुणवादमुदाहरन्ति ।। १४१ ।।

In Public domain. Digitization Muthulakshmi Research Academy

373535

विधातारं कश्चिद्भजति भजते कश्चन हरिं
सुरानन्यानन्ये जगति सफलाः सर्वविधयः ।
तथापि त्वद्भक्तेः शिव शिव यदा चर्मवदिति
श्रुतो मन्त्रो देवान्तरभजनदैन्यं न सहते ।। १४२ ।।

शशे शृङ्गं पुष्पं नभसि मृगतृष्णासु सलिलं
प्रसूतिर्वन्ध्यायामनवधिमदायुस्तनुभृताम् ।
विमुक्तिर्वा देवान्तरभजनलभ्या पशुपते
न शक्यं नः सम्भावयितुमपि सर्वं विमृशताम् ।। १४३ ।।

न भिन्ना नौरन्यानलमुदनिधेरुद्गमयितुं
शिला नैवोन्नेतुं प्रभवति शिलामन्तकरिपो ।
जनित्वा मृत्वा वा जगति परिवर्तो सुरगणः
कथं मे संसारभ्रमणभयभाजस्तु शरणम् ।। १४४ ।।

देवतान्तरपुनःपुनर्भवं
पश्यतः पशुपते भयं मम ।
क्रीडतोऽपि तव जन्म मा स्म भूत्
दीयतामयमपश्चिमो वरः ।। १४५ ।।

वासनापरिगृहीत देवता

In Public domain. Digitization Muthulakshmi Research Academy

373636

वर्णनौपयिकं सर्ववाङ्मयम्। २।-T

धिग्धिगीश्वर जडाशयं जनं

तावकैरहमसानि सङ्गतः ।। १४६ ।।

पांसुकेलिरपि यस्य शैशवे

शैवपाशुपतपादपांसुभिः ।

स्तोत्रकर्मणि न तस्य मे गुण-

स्तद्गुणोऽयमुपपद्यते त्वयि ।। १४७ ।।

स्तोत्रीयमर्थमुपपादितवानहं ते

भक्तेति भक्तजनवत्सल भाषमाणः ।

आविर्बभूविथ शिखी शुचिनाम्बरेण

यज्ञोपवीतमुपवीय धृतत्रिपुण्ड्रः ।। १४८ ।।

भक्तं भवानदित पार्श्वचरोपनीतं

गृह्यं-T महां महेश्वर पयःश्रपितं प्रसन्नम् ।

भुञ्जान एव तदहं झटिति प्रबुद्ध-

स्वप्नः समाधिरिति युक्तधियामभिन्नः ।। १४९ ।।

स्तोत्रमेतदवधाय गृह्यता- गृह्यताम्-

मर्थमस्य निखिलेन जानताम् ।

In Public domain. Digitization Muthulakshmi Research Academy

373737

ग्राह्यमन्यदपि नावशिष्यते

ज्ञेयमन्यदपि वा न किंचन ।। १५० ।।

पञ्चाशदुत्तरशता श्रुतिसूक्तिमाला

भोगावली भुजगराजमनोहरा ते ।

वेदेषु भक्तिमपरागमवैदिकेषु

तन्त्रेषु भक्तिमतुलां त्वयि च प्रसूते ।। १५१ ।।

In Public domain. Digitization Muthulakshmi Research Academy